## ति च। (८९/३०३७)

तकारादौ प्रत्यये परतः चरफलोः अकारस्य उकारादेशो भवति। चरणं चूर्तिः। [1]ब्रह्मणः चूर्तिः। [2]प्रफुल्तिः। प्रफुल्ताः सुमनसः। 'यङ्यङलुकोः', 'अभ्यासस्य' इति चानुवर्तमानमपि वचनसामर्थ्यादिह नाभिसम्बध्यते[3]॥

## रीगृदुपधस्य च। (९०/२६४४)

ऋदुपधस्याङ्गस्य योऽभ्यासः तस्य रीगागमो भवति [4]यङयङलुकोः परतः। वरीवृत्यते। वरीवृतीति। वरीवृध्यते। वरीवृधीति। नरीनृत्यते। नरीनृतीति।

[८८०] रीगृत्वत इति वक्तव्यम्। (म.भा. ३.३५९)

इहापि यथा स्यात्, वरीवृश्च्यते। वरीवृश्चीति। परीपृच्छ्यते। परीपृच्छीति॥

## रुग्रिकौ च लुकि। (९१/२६५२)

यङलुकि ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकौ आगमौ भवतः, चकाराद् रीक् च। नर्नर्ति, नरिनर्ति, नरीनर्ति। वर्वर्ति, वरिवर्ति, वरीवर्ति। [5]उकारः उच्चारणार्थः।

[८८१] मर्मृज्यते मर्मृज्यमानास इत्युपसङ्ख्यानम्। (म.भा. ३.३५९)

मर्मृज्यते। मर्मृज्यमानासः॥

## ऋतश्च। (९२/२६५३)

ऋकारान्तस्य अङ्गस्य योऽभ्यासः तस्य रुग्रिकौ आगमौ भवतः रीक् च यङलुकि। चर्कर्ति, चरिकर्ति, चरीकर्ति। जर्हर्ति। जरिहर्ति। जरीहर्ति।

तपरकरणम् किम्? किरतेश्चाकर्ति।

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत्।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन सङग्रहः॥ (म.भा. ३.३५९)

तत्रेयं प्राप्तिः तपरकरणसामर्थ्याद् अङ्गविशेषणम् ऋतः इत्येतत्, तया चाप्राप्तिः किरतेरुगादीनाम् इति॥

## सन्वल्लघुनि चङ्परेऽनग्लोपे। (९३/२३१६)

लघुनि धात्वक्षरे परतो योऽभ्यासः तस्य चङपरे णौ परतः सनीव कार्यं भवति अनग्लोपे। 'सन्यतः'

---

1. ब्रह्मचूर्तिः इ.ह. 2. नास्ति इ. 3. उत्तरार्थं तु अनुवर्तत एव इत्यधिकम् इ.ह. 4. यङि यङ्लुकि च इ.ह. 5. रुगागमे इत्यधिकम् इ.ह.